# Shri Dakshina Sheshachalesha Shrinivasa Bhagavat Stotram

# શ્રીદક્ષિણશેષાચલેશશ્રીનિવાસભગવત્સ્તોત્રમ્

## Document Information

Text title : Shri Dakshina Sheshachalesha Shrinivasa Bhagavat Stotram

File name : dakShiNAsheShAchaleshashrInivAsabhagavatstotram.itx

Category : vishhnu, stotra, venkateshwara

Location : doc_vishhnu

Author : saralakavi rAghavAchArya

Transliterated by : Aruna Narayanan narayanan.aruna at gmail.com

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : for the Deity on the hill of Vaiyavur

Latest update : March 20, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 22, 2020

*sanskritdocuments.org*

# શ્રીદક્ષિણશેષાચલેશશ્રીનિવાસભગવત્સ્તોત્રમ્

શ્રીમતે પ્રસન્નવેઙ્કટેશશ્રીનિવાસાય નમઃ ।
અયિ દક્ષિણશેષગિરીન્દ્રશિર -
    સ્યુરરીકૃતનિત્યનિવાસ હરે ।
રમયોરસિ ભાસ્વરયા સુહિતઃ
    સુચિરઞ્જય રઞ્જય સજ્જનતામ્ ॥ ૧॥

ભુવનત્રયભાગ્યવશાદુદિતો
    ભુજગોત્તમભૂમિધરોપરિગઃ ।
રમયા સહિતસ્સ્વમનોરમયા
    દયમાનમના વિહરેહ હરે ॥ ૨॥

પરિવર્ધયિતું નિજધર્મતતિં
    પરિપાલયિતું નિજભક્તજનાન્ ।
અપિ પેષયિતું દ્વિષતોઽવતર-
    સ્યહહેહ હરે સમયે સમયે ॥ ૩॥

અવતારભિદાસ્વખિલાસુ ભવાન્
    અજહત્પરમેશ ગુણાદ્યખિલમ્ ।
વિરહાસહયા રમયા સમયા
    પ્રચકાસ્તિ હરે ભવતેઽસ્તુ નમઃ ॥ ૪॥

નિત્યસૂરિનિષેવિતં પરમં પદં તદપિ ત્યજન્
    દુસ્સહાઘવિદૂનદીન નમજ્જનાવન તત્પરઃ ।
દેવદેવ ભુજઙ્ગશૈલશિરશ્રિતોઽસિ સહશ્રિયા
    ત્વત્પદામ્બુજકિઙ્કરાન્પરિપાલયાચ્યુત માદૃશાન્ ॥ ૫॥

મીનવપુરેત્ય સ ભવાનુદધિમધ્યે
    વેદગણચોરમધુકૈટભનિહન્તા ।
વેધ ઉપગીતમહિમા વ્યભવદદ્ધા

સર્વગુણપૂર્ણ ભગવન્મમ નમસ્તે ॥ ૬॥

મન્દગિરિં પયસિ મગ્નમુપરુધ્ય
ત્વય્યહહ કચ્છપપતે વહતિ પૃષ્ઠે ।
મન્થનકૃતસ્સુરવરા અમૃતમાશ્નન્
દૈવગણપૂજિત હરે મમ નમસ્તે ॥ ૭॥

ભૂમિમપહૃત્ય બહુધર્મજનિભૂમિં
સિન્ધુજલમધ્યમધિગત્ય ચ નિલીનમ્ ।
દૈત્યમભિહત્ય કિટિરૂપ ઉદ્ધારી-
સ્તાં ત્રિયુગ ભૂદયિત ભો મમ નમસ્તે ॥ ૮॥

ત્રાસિતરિપુવ્રજ મહાટ્ટ હસિતૈઃ સ્વૈ-
ર્નાથ નરસિંહ નયનારુણિમયોગાત્ ।
ક્રોધનમરૌ પ્રિયજને પ્રસદનં હૈ
દ્રાક્ કલયતેઽદ્ભુતતનો મમ નમસ્તે ॥ ૯॥

કૃષ્ણમૃગચર્મકૃતસંવરણલક્ષ્મીઃ
વામનવટો બલિમુપેત્ય યદયાચીઃ ।
તેન ફલિનોઽજનિષતેન્દ્રબલિલોકાઃ
ત્રિઃ કૃતસુવિક્રમ હરે મમ નમસ્તે ॥ ૧૦॥

સાધિતફલે ભૃગુપતે ત્વદવતારે
મૈથિલસુતારમણમેત્ય પથિ રામમ્ ।
વૈષ્ણવશરાસનમહોઽર્પણમકાર્ષી-
રાસ્થિતતપસ્ય ભગવન્મમ નમસ્તે ॥ ૧૧॥

રામ ઇતિ યસ્ય તવ નામ નિજજપ્યં
વક્તિ ગિરિશો રહસિ પર્વતકુમારીમ્ ।
સર્વજનભવ્યદ સકૃત્પ્રણતિમાત્રાત્
મૈથિલસુતારમણ રાઘવ નમસ્તે ॥ ૧૨॥

રામ ભવદીયસહભાવવિરહાભ્યાં
હૃષ્યતિ વિશુષ્યતિ ભવન્તમનુજાતઃ ।
તાદૃગનુચારકૃતિમોદિતમુરારે
શ્રીધર બલાઢ્ય ભવતાન્મમ નમસ્તે ॥ ૧૩॥

કૃષ્ણ ! ભવતો વદનપદ્મત ઉદીતા
    પાર્થમપદિશ્ય સમરાગ્રભુવિ ગીતા ।
ભાતિ જનતાવૃજિનશોષણશુભાર્થા
    સજ્જનશરણ્યચરણામ્બુજ નમસ્તે ॥ ૧૪॥

વિષ્ણુયશસસ્સુતતયા કલિયુગાન્તે
    કર્કમધિરુહ્ય કરદીપ્રકરવાલઃ ।
દુષ્ટજનતામિહ નિહત્ય ચ સરોષં
    વૈદિકપથં પુનરવિષ્યસિ નમસ્તે ॥ ૧૫॥

ઋતે શ્રીનિવાસ ગતિર્નો ગતિર્નો
    સદા શ્રીનિવાસં સ્મરાણિ સ્મરાણિ ।
મયિ શ્રીનિવાસ પ્રસીદેઃ પ્રસીદેઃ
    શુભં શ્રીનિવાસ પ્રદદ્યાઃ પ્રદદ્યાઃ ॥ ૧૬॥

દયાલો રમેશ ત્વદીયાઙ્ઘ્રિપદ્મૌ
    સુદૂરાદિહાગત્ય ભક્ત્યા નિષેવે ।
સદાસેવિનાં યત્ફલં સ્યાત્તદેતત્
    સકૃત્સેવિને મે પ્રદેહિ પ્રદેહિ ॥ ૧૭॥

અશેષાનપિ મેદોષાન્ શ્રીનિવાસ પ્રમાદજાન્ ।
ક્ષમેથાસ્ત્વં ક્ષમેથાસ્ત્વં દેવદેવ દયાનિધે ॥ ૧૮॥

ગોવિન્દોપાસનપર સીતારામો નામ ત્વત્પ્રિયકારી ।
લક્ષ્મીવાસ ત્વજ્જનહૃદ્યો જીયાદસ્યાં ભુવિ શતમબ્દાન્ ॥ ૧૯॥

સુરગણકીર્તનગોચરપાવનમઙ્ગલનામસહસ્ર વિભો
    ફણિપતિશેષમહીધરશૃઙ્ગવિભૂષણસુન્દરમન્દિર ભોઃ ।
કમલગૃહામૃદુપાણિસરોરુહસંવહનાસહપાદયુગ
    ત્વમિહ હરે વિહરસ્વ ચિરં વિનમજ્જનતાશુભદાયિતયા ॥ ૨૦॥

શેષભૂમિધરશૃઙ્ગવિહારિ શ્રીનિવાસભગવત્પરિતુષ્ટ્યૈ ।
સ્તોત્રમેતદુદગીયત ભક્ત્યા રાઘવેણ કવિના સરલેન ॥

ઇતિ સરલકવિરાઘવસૂરિગીતં દક્ષિણશેષાચલેશ
શ્રીનિવાસભગવત્સ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan

*Shri Dakshina Sheshachalesha Shrinivasa Bhagavat Stotram*

pdf was typeset on March 22, 2020

Please send corrections to *sanskrit@cheerful.com*